# Natya Shastra Chapter 9

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૯

## Document Information

Text title : naaTyashaastra adhyaaya 9

File name : natya09.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : September 7, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૯

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ ષષ્ઠોઽધ્યાયઃ ।
અથ નવમોઽધ્યાયઃ ।
એવમેતચ્છિરોનેત્રભ્રુનાસોષ્ઠકપોલજમ્ ।
કર્મ લક્ષણસંયક્તમુપાઙ્ગાનાં મયોદિતમ્ ॥ ૧॥

હસ્તોરપાર્શ્વજઠરકટીજઙ્ઘોરુપાદતઃ ।
લક્ષણં સમ્પ્રવક્ષ્યામિ વિનિયોગં ચ તત્ત્વતઃ ॥ ૨॥

હસ્તાદીનાં પ્રવક્ષ્યામિ કર્મ નાટ્યપ્રયોજકમ્
યથા યેનાભિનેયં ચ તન્મે નિગદતઃ શ‍ૃણુ ॥ ૩॥

પતાકસ્ત્રિપતાકશ્ચ તથા વૈ કર્તરીમુખઃ ।
અર્ધચન્દ્રો હ્યરાલશ્ચ શુકતુણ્ડસ્તથૈવ ચ ॥ ૪॥

મુષ્ટિશ્ચ શિખરાખ્યશ્ચ કપિત્થઃ ખટકામુખઃ ।
સૂચ્યાસ્યઃ પદ્મકોશશ્ચ તથા વૈ સર્પશીર્ષકઃ ॥ ૫॥

મૃગશીર્ષઃ પરો જ્ઞેયો હસ્તાભિનયયોક્તૃભિઃ ।
કાઙ્ગુલકોઽલપદ્મશ્ચ ચતુરો ભ્રમરસ્તથ ॥ ૬॥

હંસાસ્યો હંસપક્ષશ્ચ સન્દંશો મુકુલસ્તથા ।
ઊર્ણનાભસ્તામ્રચૂડચતુર્વિંશતિરીરિતાઃ ॥ ૭॥

અસંયુતાઃ સંયુતાશ્ચ ગદતો મે નિબોધત ।
અઞ્જલિશ્ચ કપોતશ્ચ કર્કટઃ સ્વસ્તિકસ્તથા ॥ ૮॥

ખટકાવર્ધમાનશ્ચ હ્યુત્સંગો નિષધસ્તથા ।
દોલઃ પુષ્પપુટશ્ચૈવ તથા મકર એવ ચ ॥ ૯॥

ગજદન્તોઽવહિત્થશ્ચ વર્ધમાનસ્તથૈવ ચ ।
એતે તુ સંયુતા હસ્તા મયા પ્રોક્તાસ્ત્રયોદશ ॥ ૧૦॥

નૃત્તહસ્તાનતશ્ચોર્ધ્વં ગદતો મે નિબોધત ।
ચતુરસ્રૌ તથોદ્વૃત્તૌ તથા તલમુખૌ સ્મૃતૌ ॥ ૧૧॥

સ્વસ્તિકૌ વિપ્રકીર્ણૌ ચાપ્યરાલખટકામુખૌ ।
આવિદ્ધવક્રૌ સૂચ્યાસ્યૌ રેચિતાવર્ધરેચિતૌ ॥ ૧૨॥

ઉત્તાનાવઞ્ચિતૌ વાપિ પલ્લવૌ ચ તથા કરૌ ।
નિતમ્બૌ ચાપિ વિજ્ઞેયૌ કેશબન્ધૌ તથૈવ ચ ॥ ૧૩॥

સમ્પ્રોક્તૌ કરિહસ્તૌ ચ લતાખ્યૌ ચ તથૈવ ચ ।
પક્ષવઞ્ચિતકૌ ચૈવ પક્ષપ્રદ્યોતકૌ તથા ॥ ૧૪॥

જ્ઞેયો ગરુડપક્ષૌ ચ હંસપક્ષૌ તથૈવ ચ ।
ઊર્ધ્વમણ્ડલિનૌ ચૈવ પાર્શ્વમણ્ડલિનૌ તથા ॥ ૧૫॥

ઉરોમણ્ડલિનૌ ચૈવ ઉરઃપાર્શ્વાર્ધમણ્ડલૌ ।
મુષ્ટિકસ્વસ્તિકૌ ચાપિ નલિનીપદ્મકોશકૌ ॥ ૧૬॥

અલપદ્માવુલ્બનૌ ચ લલિતૌ વલિતૌ તથા ।
સપ્તષષ્ટિકરા હ્યેતે નામતોઽભિહિતા મયા ॥ ૧૭॥

યથા લક્ષણમેતેષાં કર્માણિ ચ નિબોધત ।
પ્રસારિતાઃ સમાઃ સર્વા યસ્યાઙ્ગુલ્યો ભવન્તિ હિ ।
કુઞ્ચિતશ્ચ તથાઙ્ગુષ્ઠઃ સ પતાક ઇતિ સ્મૃતઃ ॥ ૧૮॥

એષ પ્રહારપાતે પ્રતાપન નોદને પ્રહર્ષે ચ ।
ગર્વેઽપ્યહમિતિ તજ્જ્ઞૈલલાટદેશોત્થિતઃ કાર્યઃ ॥ ૧૯॥

એષોઽગ્નિવર્ષધારાનિરૂપણે પુષ્પવૃષ્ટિપતને ચ ।
સંયુતકરણઃ કાર્યઃ પ્રવિરલચલિતાઙ્ગુલિર્હસ્તઃ ॥ ૨૦॥

સ્વસ્તિકવિચ્યુતિકરણાત્ પલ્લવપુષ્પોપહારશષ્પાણિ ।
વિરચિતમુર્વીસંસ્થં યદ્ દ્રવ્ય તચ્ચ નિર્દેશ્યમ્ ॥ ૨૧॥

સ્વસ્તિકવિચ્યુતિકરણાત્ પુનરેવાધોમુખેન કર્તવ્યમ્ ।
સંવૃતવિવૃતં પાલ્યં છન્નં નિબિડં ચ ગોપ્યં ચ ॥ ૨૨॥

અસ્યૈવ ચાઙ્ગુલીભિરધોમુખપ્રસ્થિતોત્થિતચલાભિઃ ।

વાયૂર્મિવેગવેલાક્ષોભશ્ચૌઘશ્ચ કર્તવ્યઃ ॥ ૨૩॥

ઉત્સાહનં બહુ તથા મહાજનપ્રાંશુપુષ્કરપ્રહતમ્ ।
પક્ષોત્ક્ષેપાભિનયં રેચકકરણેન ચાભિનયેત્ ॥ ૨૪॥

પરિધૃષ્ટતલસ્થેન તુ ધૌતં મૃદિતં પ્રમૃષ્ટપિષ્ટે ચ ।
પુનરેવ શૈલધારણમુદ્ઘાટનમેવ ચાભિનયેત્ ॥ ૨૫॥

એવમેષ પ્રયોક્તવ્યઃ સ્ત્રીપુંસાભિનયે કરઃ ।
પતાકાભ્યાં તુ હસ્તાભ્યામભિનેયઃ પ્રયોક્તૃભિઃ ॥ ૨૬॥

દશાખ્યશ્ચ શતાખ્યશ્ચ સહસ્રાખ્યસ્તથૈવ ચ ।
અતઃ પરં પ્રવક્ષ્યામિ ત્રિપતાકસ્ય લક્ષણમ્ ॥ ૨૭॥

પતાકે તુ યદા વક્રાઽનામિકા ત્વઙ્ગુલિર્ભવેત્ ।
ત્રિપતાકઃ સ વિજ્ઞેયઃ કર્મ ચાસ્ય નિબોધત ॥ ૨૮॥

આવાહનમવતરણં વિસર્જનં વારણં પ્રવેશશ્ચ ।
ઉન્નામનં પ્રણામો નિદર્શનં વિવિધવચનં ચ ॥ ૨૯॥

મઙ્ગલ્યદ્રવ્યાણાં સ્પર્શઃ શિરસોઽથ સન્નિવેશશ્ચ ।
ઉષ્ણીષમુકુટધારણં નાસાસ્યશ્રોત્રસંવરણમ્ ॥ ૩૦॥

અસ્યૈવ ચાઙ્ગુલીભ્યામધોમુખપ્રસ્થિતોત્થિતચલાભ્યામ્ ।
લઘુપવનસ્રોતોભુજગભ્રમરાદિકાન્ કુર્યાત્ ॥ ૩૧॥

અશ્રુપ્રમાર્જને તિલકવિરચનં રોચનયાલમ્ભકં ચ
ત્રિપતાકાનામિકયા સ્પર્શનમલકસ્ય કાર્યઞ્ચ ॥ ૩૨॥

સ્વસ્તિકૌ ત્રિપતાકૌ તુ ગુરૂણાં પાદવન્દને ।
વિચ્યુતૌ ચલિતાવસ્થૌ કાર્યાવુદ્વાહદર્શને ॥ ૩૩॥

પરસ્પરાગ્રસંશ્લિષ્ટૌ કર્તવ્યૌ નૃપદર્શને ।
તિર્યક્ સ્વસ્તિકસમ્બદ્ધૌ સ્યાતાં તૌ ગ્રહદર્શને ॥ ૩૪॥

તપસ્વિદર્શને કાર્યાવૂર્ધ્વૌ ચાપિ પરાઙ્મુખૌ ।
પરસ્પરાભિમુખૌ ચ કર્તવ્યૌ વરદર્શને ॥ ૩૫॥

ઉત્તાનાધોમુખૌ કાર્યાવગ્રે વક્ત્રસ્ય સંસ્થિતૌ ।
વડવાનલસઙ્ગ્રામમકરાણાં ચ દર્શને ॥ ૩૬॥

અભિનયાસ્ત્વનેનૈઅવ વાનરપ્લવનોર્મયઃ ।
પવનશ્ચ સ્ત્રિયશ્ચૈવ નાટ્યે નાટ્યવિચક્ષણૈઃ ॥ ૩૭॥

સંમુખપ્રસૃતાઙ્ગુષ્ઠઃ  કાર્યો બાલેન્દુદર્શને ।
પરાઙ્ગ્મુખસ્તુ કર્તવ્યો યાને નૃણાં પ્રયોક્તૃભિઃ ॥ ૩૮॥

ત્રિપતાકે યદા હસ્તે ભવેત્ પૃષ્ઠાવલોકની
તર્જની મધ્યમાયાશ્ચ તદાસૌ કર્તરીમુખઃ  ॥ ૩૯॥

પથિ ચરણરચનરઞ્જનરઙ્ગણકરણાન્યધોમુખેનૈવ ।
ઊર્ધ્વમુખેન તુ કુર્યાત્ દષ્ટં શ઼ૃઙ્ગં ચ લેખ્યં ચ ॥ ૪૦॥

પતનમરણવ્યતિક્રમપરિવૃત્તવિતર્કિત તથ ન્યસ્તમ્ ।
ભિન્નવલિતેન કુર્યાત્ કર્તર્યાસ્યાઙ્ગુલિમુખેન ॥ ૪૧॥

સંયુતકરણો વ સ્યાદસંયુતો વા પ્રયુજ્યતે તજ્ઞૈઃ ।
રુરુચમરમહિષસુરગજવૃષગોપુરશૈલશિખરેષુ ॥ ૪૨॥

યસ્યાઙ્ગુલ્યસ્તુ વિનતાઃ સહાઙ્ગુષ્ઠેન ચાપવત્ ।
સોઽર્ધચન્દ્રો હિ વિજ્ઞેયઃ કરઃ કર્માસ્ય વક્ષ્યતે ॥ ૪૩॥

એતેન બાલતરવઃ  શશિલેખામ્બુકલશવલયાનિ ।
નિર્ધાટનમાયસ્તં મધ્યૌપમ્યં ચ પીનં ચ ॥ ૪૪॥

રશનાજઘનકટીનામાનનતલપત્રકુણ્ડલાદીનામ્ ।
કર્તવ્યો નારીણામભિનયયોગોઽર્ધચન્દ્રેણ ॥ ૪૫॥

આદ્યા ધનુર્નતા કાર્યા કુઞ્ચિતાઙ્ગુષ્ઠકસ્તથા ।
શેષા ભિન્નોર્ધ્વવલિતા હ્યરાલેઽઙ્ગુલયઃ કરે ॥ ૪૬॥

એતેન સત્ત્વશૌણ્ડીર્યવીર્યધૃતિકાન્તિદિવ્યગામ્ભીગ્રમ્ ।
આશીર્વાદાશ્ચ તથા ભાવા હિતસંજ્ઞકાઃ કાર્યાઃ ॥ ૪૭॥

એતેન પુનઃ સ્ત્રીણાં કેશાનાં સંગ્રહોત્કર્ષૌ ।
સર્વાઙ્ગિકં તથૈવ ચ નિર્વર્ણનમાત્મનઃ કાર્યમ્ ॥ ૪૮॥

કૌતુકવિવાહયોગં પ્રદક્ષિણેનૈવ સમ્પ્રયોગં ચ ।
અઙ્ગુલ્યગ્રસ્વસ્તિકયોગાન્ પરિમણ્ડલેનૈવ ॥ ૪૯॥

પ્રાદ્ક્ષિણ્યऽ પરિમણ્ડલં ચ કુર્યાન્ મહાજનં ચૈવ ।
યચ્ચ મહીતલરચિતં દ્રવ્યં તચ્ચાભિનેયં સ્યાત્ ॥ ૫૦॥

આહ્વાને ચ નિવારણનિર્માણે ચાપ્યનેકવચને ચ ।
સ્વેદસ્યા ચાપનયને ગન્ધાઘ્રાણે શુભઃ શુભે ચૈષ ॥ ૫૧॥

ત્રિપતાકહસ્તજાનિ તુ પૂર્વં યાન્યભિહિતાનિ કર્માણિ ।
તાનિ ત્વરાલયોગાત્ સ્ત્રીભિઃ સમ્યક્ પ્રયોજ્યાનિ ॥ ૫૨॥

અરાલસ્ય યદા વક્રાઽનામિકાત્વઙ્ગુલિર્ભવેત્ ।
શુકતુણ્ડસ્તુ સ કરઃ કર્મ ચાસ્ય નિબોધત ॥ ૫૩॥

એતેન ત્વભિનેયં નાહં ન ત્વં ન કૃત્યમિતિ ચાર્થે ।
આવાહને વિસર્ગે ધિગિતિ વચને ચ સાવજ્ઞમ્ ॥ ૫૪॥

અઙ્ગુલ્યો યસ્ય હસ્તસ્ય તલમધ્યેગ્રસંસ્થિતાઃ ।
તાસામુપરિ ચાઙ્ગુષ્ઠઃ સઃ  મુષ્ટિરિતિ સંજ્ઞિતઃ ॥ ૫૫॥ ।

એષ પ્રહારે વ્યાયામે નિર્ગમે પીડને તથા ।
સંવાહનેઽસિયષ્ટીનાં કુન્તદણ્ડગ્રહે તથા ॥ ૫૬॥

અસ્યૈવ તુ યદા મુષ્ટેરૂર્ધ્વોઽઙ્ગુષ્ઠઃ પ્રયુજ્યતે ।
હસ્તઃ સ શિખરો નામ તદા જ્ઞેયઃ પ્રયોક્તૃભિઃ ॥ ૫૭॥

રશ્મિકુશાઙ્કુશધનુષાં તોમરશક્તિપ્રમોક્ષણે ચૈવ ।
અધરોષ્ઠપાદરઞ્જનમલકસ્યોત્ક્ષેપણં ચૈવ ॥ ૫૮॥

અસ્યૈવ શિખરાખ્યસ્ય હ્યઙ્ગુષ્ઠકનિપીડિતા ।
યદા પ્રદેશિની વક્રા સ કપિત્થસ્તદા સ્મૃતઃ ॥ ૫૯॥

અસિચાપચક્રતોમરકુન્તગદાશક્તિવજ્રબાણાનિ ।
શસ્ત્રાણ્યભિનેયાનિ તુ કાર્યં સત્યં ચ પથ્યં ચ  ॥ ૬૦॥

ઉત્ક્ષિપ્તવક્રા તુ યદાનામિકા સકનીયસી ।
અસ્યૈવ તુ કપિત્થસ્ય તદાસો ખટકામુખઃ ॥ ૬૧॥

હોત્રં હવ્યં છત્રં પ્રગ્રહપરિકર્ષણં વ્યજનકઞ્ચ ।
આદર્શધારણં ખણ્ડનં તથા પેષણં  ચૈવ ॥ ૬૨॥

આયતદણ્ડગ્રહણં મુક્તાપ્રાલમ્બસંગ્રહં ચૈવ  ।
સ્રગ્દામપુષ્પમાલા વસ્ત્રાન્તાલમ્બનં ચૈવ ॥  ૬૩॥

મન્મથશરાવકર્ષણપુષ્પવચયપ્રતોદકાર્યાણિ ।

અઙ્કુશરજ્વાકર્ષણસ્ત્રીદર્શનમેવ કાર્યં ચ ॥ ૬૪॥

ખટકાખ્યે યદા હસ્તે તર્જની સમ્પ્રસારિતા ।
હસ્તઃ સૂચીમુખો નામ તદા જ્ઞેયઃ પ્રયોક્તૃભિઃ ॥ ૬૫॥

અસ્ય વિવિધાન્ યોગાન્ વક્ષ્યામિ સમાસતઃ પ્રદેશિન્યાઃ ॥

ઊર્ધ્વનતલોલકમ્પિતવિજૃંભિતોદ્વાહિતચલાયાઃ ॥ ૬૬॥

ચક્રં તડિત્પતાકામઞ્જર્યઃ કર્ણચૂલિકાશ્ચૈવ ।
કુટિલગતયશ્ચ સર્વે નિર્દેશ્યાઃ સાધુવાદાશ્ચ ॥ ૬૭॥

બાલોરગબલ્યવધૂપદીપવલ્લીલતાશિખણ્ડાશ્ચ ।
પરિપતનવક્રમણ્ડલમભિનેયાન્યૂર્ધ્વલોલિતયા ॥ ૬૮॥

વદનાભ્યાસે કુઞ્ચિતવિજૃમ્ભિતા વાક્યરૂપણે કાર્યા ।
ભૂયશ્ચોર્ધ્વવિરચિતા તારાઘોણૈકદણ્ડયષ્ટિષુ ચ ।
વિનતાઃ ચ પુનઃ કાર્યા દંષ્ટ્રિષુ ચ તથાસ્યયોગેન ॥ ૬૯॥

પુનરપિ મણ્ડલગતયા સર્વગ્રહણં તથૈવ લોકસ્ય ।
પ્રણતોન્તી ચ કાર્યે હ્યાઘે દીર્ઘે ચ દિવસે ચ ॥ ૭૦॥

[શ્રવણાભ્યાસે વક્રા વિજૃમ્ભણા વાક્યરૂપણાવસરે ॥]
મેતિ વદેતિ ચ યોજ્યા પ્રસારિતોત્કમ્પિતોત્તાના ॥ ૭૧॥

કાર્યા પ્રકમ્પિત રોવદર્શન સ્વેદરૂપણે ચૈવ ।
કુન્તલકુણ્ડલાઙ્ગદગણ્ડાશ્રયેઽભિનય ॥ ૭૨॥

ગર્વેઽહમિતિ લલાટે રિપુદર્શને તથૈવ ચ ક્રોધે ।
કોઽસાવિતિ નિર્દેશેઽથ કર્ણકણ્ડુનયને ચૈવ ॥ ૭૩॥

સંયુક્તા સંયોગે કાર્યા વિશ્લેષિતા વિયોગે ચ ।
કલહે સ્વસ્તિકયુપતાં પરસ્પરોત્પીડિતા બન્ધે ॥ ૭૪॥

દ્વાભ્યાં તુ વાત્મપાર્શ્વે દક્ષિણતો નિનનિશાવસાનાનિ ।
અભિમુખપરાઙ્મુખાભ્યાં વિશ્લિષ્ટાભ્યાં પ્રયુઞ્જીત ॥ ૭૫॥

પુનરપિ ચ ભ્રમિતાગ્રરૂપા શિલાવર્તયન્ત્રશૈલેષુ ।
પરિવેષણે તથૈવ હિ કાર્યા ચાધોમુખી નિત્યમ્ ॥ ૭૬॥

શ્લિષ્ટા લલાટપટ્ટેષ્વધોમુખી શમ્ભુરૂપણે કર્યા ।

શકસ્યાપ્યુત્તાના તજ્જ્ઞૈસ્તિર્યક્સ્થિતા કાર્યા ॥ ૭૭॥

દ્વાભ્યાં સન્દર્શયેન્નિત્યં સમ્પૂર્ણં ચન્દ્રમણ્ડલમ્ ।
શ્લિષ્ટા લલાટે શક્રસ્ય કાર્યા હ્યુત્તાનસંશ્રયા ॥ ૭૮॥

પરિમણ્ડલં ભ્રમિતતયા મણ્ડલમાદર્શયેચ્ચ ચન્દ્રસ્ય ।
હરનયને ચ લલાટે શક્રસ્યઽપ્યુગુત્તાના ॥ ૭૯॥

યસ્યાઙ્ગુલ્યસ્તુ વિતતાઃ સહાઙ્ગુષ્ઠેન કુઞ્ચિતાઃ ।
ઊર્ધ્વા હ્યસંગતાગ્રાશ્ચ સ ભવેત્ પદ્મકોશકઃ ॥ ૮૦॥

બિલ્વકપિત્થફલાનાં ગ્રહણે કુચદર્શનશ્ચ નારીણામ્ ।
ગ્રહણે હ્યામિષલાભે  ભવન્તિ તાઃ કુઞ્ચિતાગ્રાસ્તુ ॥ ૮૧॥

બહુજાતિબીજપૂરકમામિષખણ્ડં ચ નિર્દેશ્યમ્ ।
દેવાર્ચનબલિહરણે સમુદ્ગકે સાગ્રપિણ્ડદાને ચ ।
કાર્યઃ પુષ્પપ્રકરશ્ચ પદ્મકોશેન હસ્તેન ॥ ૮૨॥

મણિબન્ધનવિશ્લિષ્ટાભ્યાં પ્રવિરલચલિતાઙ્ગુલિકરાભ્યામ્ ।
કાર્યો વિવર્તિતાભ્યાં વિકસિતકમલોત્પલાવિનયઃ ॥ ૮૩॥

અઙ્ગુલ્યઃ સંહતાઃ સર્વાઃ સહાઙ્ગુષ્ઠેન યસ્ય ચ ।
તથા નિમ્નતલશ્ચૈવ સ તુ સર્પશિરાઃ કરઃ ॥ ૮૪॥

એષઃ સલિલપ્રદાને ભુજગતૌ તોયસેચને ચૈવ ।
આસ્ફોટને ચ યોજ્યઃ કરિકુમ્ભાસ્ફાલનાદ્યેષુ ॥ ૮૫॥

અધોમુખીનાં સર્વાસામઙ્ગુલીનાં સમાગમઃ ।
કનિષ્ઠાઙ્ગુષ્ઠકાવૂર્ધ્વૌ સ ભવેત્ મૃગશીર્ષકઃ ॥ ૮૬॥

ઇહ સામ્પ્રતમસ્ત્યદ્ય શક્તેશ્ચોલ્લાસનેઽક્ષપાતે ચ ।
સ્વેદાપમાર્જનેષુ ચ કુટ્ટમિતે પ્રચલિતસ્તુ ભવેત્ ॥ ૮૭॥

ત્રેતાગ્નિસંસ્થિતા મધ્યા તર્જન્યાઙ્ગુષ્ઠકા યદા ।
કાઙ્ગુલોઽનામિકા વક્રા યદાશ્ચોર્ધ્વા કનીયસી ॥ ૮૮॥

એતેન તરુણફલાનિ નાનાવિધાનિ ચ લઘૂનિ ।
કાર્યાનિ રોષજાનિ સ્ત્રીવચાન્યઙ્ગુલિક્ષેપૈઃ ॥ ૮૯॥

મરકતવૈદૂર્યાદિઃ  પ્રદર્શનં સુમનસાં ચ કર્તવ્યમ્ ।
ગ્રાહ્યં મરાલપદમિતિ તજ્જ્ઞૈરેવ પ્રયોગેષુ ॥ ૯૦॥

આવર્તિતાઃ કરતલે યસ્યાઙ્ગુલ્યો ભવન્તિ હિ ।
પાર્શ્વાગતવિકીર્ણાશ્ચ સ ભવેદલપલ્લવઃ ॥ ૯૧॥

પ્રતિષેધકૃતે યોજ્યઃ કસ્ય ત્વન્નાસ્તિ શૂન્યવચનેષુ ।
પુનરાત્મોપન્યાસઃ સ્ત્રીણામેતેન કર્તવ્યઃ ॥ ૯૨॥

તિસ્રઃ પ્રસારિતા યત્ર તથા ચોર્ધ્વા કનીયસી ।
તાસાં મધ્યે સ્થિતોઙ્ગુષ્ઠઃ સ કરશ્ચતુરસ્મૃતઃ ॥ ૯૩॥

નયવિનયનિયમસુનિતુણબાલાતુરસત્યકૈતવાર્થેષુ ।
વાક્યે યુક્તે પથ્યે સત્યે પ્રશમે ચ વિનિયોજ્યઃ ॥ ૯૪॥

એકેન દ્વાભ્યાં વા કિઞ્ચિન્મણ્ડલકૃતેન હસ્તેન ।
વિકૃતવિચારિતચરિતં વિતર્કિતં લજ્જિતં ચૈવ ॥ ૯૫॥

નયનૌપમ્યં પદ્મદલરૂપણં હરિણકર્ણનિર્દેશઃ ।
સંયુતકરણેનૈવ તુ ચરેણૈતાનિ કુર્વીત ॥ ૯૬॥

લીલા રતી રુચિ ચ સ્મૃતિબુદ્ધિવિભાવનાઃ ક્ષમાં પુષ્ટિં ચ ।
સઞ્જ્ઞામાત્રં પ્રણયં વિચારણં સઙ્ગતં શૌચમ્ ॥ ૯૭॥

ચાતુર્યં માધુર્યં દાક્ષિણ્યં માર્દવં સુખં શીલમ્ ।
પ્રશ્નં વાર્તાયુક્તિં વેષં મૃદુશાદ્વલં સ્તોકમ્ ॥ ૯૮॥

વિભવાવિભૌ સુરતં ગુણાગુણૌ યૌવનં ગૃહાન્ દારાન્ ।
નાનાવર્ણાશ્ચ તથા ચતુરેણૈવં પ્રયુઞ્જીત ॥ ૯૯॥

સિતમૂર્ધ્વેન તુ કુર્યાત્ રક્તં પીતં ચ મણ્ડલકૃતેન ।
પરિમુદિતેન તુ નીલં વર્ણાશ્ચતુરેણ હસ્તેન ॥ ૧૦૦॥

મધ્યમાઙ્ગુષ્ઠસન્દંશો વક્રા ચૈવ પ્રદેશિની ।
ઊર્ધ્વમન્યે પ્રકીર્ણે ચ દ્વ્યઙ્ગુલ્યૌ ભ્રમરે કરે ॥ ૧૦૧॥

પદ્મોત્પલકુમુદાનામન્યેષાં ચૈવ દીર્ઘવૃન્તાનામ્ ।
પુષ્પાણાં ગ્રહણવિધિઃ કર્તવ્યઃ કર્ણપુરશ્ચ ॥ ૧૦૨॥

વિચ્યુતશ્ચ સશબ્દશ્ચ કાર્યો નિર્ભર્ત્સનાદિષુ ।
બાલાલાપે ચ શીઘ્રે ચ તાલે વિશ્વાસને તથા ॥ ૧૦૩॥

તર્જનીમધ્યમાઙ્ગુષ્ઠાસ્ત્રેતાગ્નિસ્થા નિરન્તરાઃ ।

ભવેયુર્હંસવક્ત્રસ્ય શેષે દ્વે સમ્પ્રસારિતે ॥ ૧૦૪॥

શ્લક્ષ્ણાલ્પશિથિલલાઘવનિસ્સારાર્થે મૃદુત્વયોગેષુ ।
કાર્યોઽભિનયવિશેષઃ કિઞ્ચિત્પ્રસ્યન્દિતાગ્રેણ ॥ ૧૦૫॥

સમાઃ પ્રસારિતાસ્તિસ્રસ્તથા ચોર્ધ્વા કનીયસી ।
અઙ્ગુષ્ઠઃ કુઞ્ચિતશ્ચૈવ હંસપક્ષ ઇતિ સ્મૃતઃ ॥ ૧૦૬॥

એષ ચ નિવાપસલિલે દાતવ્યે ગણ્ડસંશ્રયે ચૈવ ।
કાર્યઃ પ્રતિગ્રહાચમનભોજનાર્થેષુ વિપ્રાણામ્ ॥ ૧૦૭॥

આલિઙ્ગને મહાસ્તમ્ભદર્શને રોમહર્ષણે ચૈવ ।
સ્પર્શેઽનુલેપનાર્થે યોજ્યઃ સંવાહને ચૈવ ॥ ૧૦૮॥

પુનરેવ ચ નારીણાં સ્તનાન્તરસ્થેન વિભ્રમવિશેષાઃ ।
કાર્યા યથારસં સ્યુર્દુઃખે હનુધારણે ચૈવ ॥ ૧૦૯॥

તર્જન્યઙ્ગુષ્ઠસન્દંશસ્ત્વ હ્યરાલસ્ય યથા ભવેત્ ।
આભુગ્નતલમધ્યસ્થઃ સ સન્દંશ ઇતિ સ્મૃતઃ ॥ ૧૧૦॥

સન્દંશસ્ત્રિવિધો જ્ઞેય હ્યગ્રજો મુખજસ્તથા ।
તથા પાર્શ્વગતશ્ચૈવ રસભાવોપબૃંહિતઃ ॥ ૧૧૧॥

પુષ્પાપચયગ્રથને ગ્રહણે તૃણપર્ણકેશસૂત્રાણામ્ ।
શલ્યાવયવગ્રહણાપકર્ષણે ચાગ્રસન્દંશઃ ॥ ૧૧૨॥

વૃન્તાત્ પુષ્પોદ્ધરણં વર્તિશલાકાદિપૂરણં ચૈઅવ ।
ધિગિતિ ચ વચનં રોષે મુખસન્દંશસ્ય કર્માણિ ॥ ૧૧૩॥

યજ્ઞોપવીતધારણવેધનગુણસૂક્ષ્મબાણલક્ષ્યેષુ ।
યોગે ધ્યાને સ્તોકે સંયુક્તકરણસ્તુ કર્તવ્યઃ ॥ ૧૧૪॥

પેશલકુત્સાસૂયાદોષવચને ચ વામહસ્તેન ।
કિઞ્ચિદ્ વિવર્તિતકરાગ્રઃ પ્રયુજ્યતે પાર્શ્વસન્દંશઃ ॥ ૧૧૫॥

આલેખ્યનેત્રરઞ્જનવિતર્કવન્તપ્રવાલરચને ચ ।
નિષ્પીડનં તથાલક્તકસ્ય કાર્યં ચ નારીભિઃ ॥ ૧૧૬॥

સમાગતાગ્રાઃ સહિતા યસ્યાઙ્ગુલ્યો ભવન્તિ હિ ।
ઊર્ધ્વા હંસમુખસ્યેવ સ ભવેન્મુકુલઃ કરઃ ॥ ૧૧૭॥

દેવાર્ચ્યનબલિકરણે પદ્મોત્પલકુમુદરૂપણે ચૈવ ।
વિટચુમ્બને ચ કાર્યો વિકુત્સિતે વિપ્રકીર્ણશ્ચ ॥ ૧૧૮॥

ભોજનહિરણ્યગણનામુખસંકોચપ્રદાનશીઘ્રેષુ ।
મુકુલિતકુસુમેષુ ચ તથા તજ્જ્ઞૈરેષ પ્રયોક્તવ્યઃ ॥ ૧૧૯॥

પદ્મકોશસ્ય હસ્તસ્ય હ્યઙ્ગુલ્યઃ કુઞ્ચિતા યદા ।
ઊર્ણનાભઃ સ વિજ્ઞેયઃ કેશચૌર્યગ્રહાદિષુ ॥ ૧૨૦॥

શિરઃ કણ્ડૂયને ચૈવ કુષ્ઠવ્યાધિનિરૂપણે ।
સંહવ્યાઘ્રેષ્વભિનયઃ પ્રસ્તરગ્રહણે તથા ॥ ૧૨૧॥

મધ્યમાઙ્ગુષ્ઠસન્દંશો વક્રા ચૈવ પ્રદેશિની ।
શેષે તલસ્થે કર્તવ્યે તામ્રચૂલકરેઽઙ્ગુલી ॥ ૧૨૨॥

વિચ્યુતશ્ચ સશબ્દશ્ચ કાર્યો નિર્ભત્સનાદિષુ ।
તાલે વિશ્વસને ચૈવ શીઘ્રાર્થે સંજ્ઞિતેષુ ચ ॥ ૧૨૩॥

તથા કલાસુ કાષ્ઠાસુ નિમેષે તુ ક્ષણે તથા ।
એશ એવ કરઃ કાર્યો બાલાલાપનિમન્ત્રણે ॥ ૧૨૪॥

અથવા અઙ્ગુલ્યઃ સંહિતા વક્રા ઉપર્યુઙ્ગુષ્ઠપીડિતાઃ ।
પ્રસારિતા કનીષ્ઠાચ તામ્રચૂડઃ કરઃ સ્મૃતઃ ॥ ૧૨૫॥

શતં સહસ્રં લક્ષં ચ કરેણૈકેન યોજયેત્ ।
ક્ષિપ્રમુક્તાઙ્ગુલીભિસ્તુ સ્ફુલિઙ્ગાન્ વિપ્રુષસ્તથા ॥ ૧૨૬॥

અસંયુતાઃ કરા હ્યેતે મયા પ્રોક્તા દ્વિજોત્તમાઃ ।
અતશ્ચ સંયુતાન્ હસ્તાન્ ગદતો મે નિબોધત ॥ ૧૨૭॥

પતાકાભ્યાં તુ હસ્તાભ્યાં સંશ્લેષાદઞ્જલિઃ સ્મૃતઃ ।
દેવતાનાં ગુરૂણાં ચ મિત્રાણાં ચાભિવાદને ॥ ૧૨૮॥

સ્થાનાન્યસ્ય પુનસ્ત્રીણિ વક્ષો વક્ત્રં શિરસ્તથા ।
દેવતાનાં શિરઃસ્થસ્તુ ગુરૂણામાસ્યસંસ્થિતઃ ।
વક્ષસ્થશ્ચૈવ મિત્રાણાં સ્ત્રીણાં ત્વનિયતો ભવેત્ ॥ ૧૨૯॥

ઉભાભ્યામપિ હસ્તાભ્યામન્યોઽન્યં પાર્શ્વસંગ્રહાત્ ।
હસ્તઃ કપોતકો નામ કર્મ ચાસ્ય નિબોધત ॥ ૧૩૦॥

એષ વિનયાભ્યુપગમે પ્રણામકરણે ગુરોશ્ચ સમ્ભાષે ।

શીતે ભયે ચ કાર્યો વક્ષઃસ્થઃ કમ્પિતઃ સ્ત્રીભિઃ ॥ ૧૩૧॥

અયમેવાઙ્ગુલિપરિઘૃષ્યમાણમુક્તસ્તુ ખિન્નવાક્યેષુ ।
એતાવદિતિ ચ કાર્યો નેદાનીં કૃત્યમિતિ ચાર્થે ॥ ૧૩૨॥

અઙ્ગુલ્યો યસ્ય હસ્તસ્ય હ્યન્યોન્યાન્તરનિસ્સૃતાઃ ।
સ કર્કટ ઇતિ જ્ઞેયઃ કરઃ કર્મ ચ વક્ષ્યતે ॥ ૧૩૩॥

એષ મદનાઙ્ગમર્દે સુપ્તોત્થિતવિજૃમ્ભણે બૃહદ્દેહે ।
હનુધારણે ચ યોજ્યઃ શઙ્ખગ્રહણેઽર્થતત્ત્વજ્ઞૈઃ ॥ ૧૩૪॥

મણિબન્ધનવિન્યસ્તાવરાલૌ સ્ત્રીપ્રયોજિતૌ ।
ઉત્તાનૌ વામપાર્શ્વસ્થૌ સ્વસ્તિકઃ પરિકીર્તિતઃ ॥ ૧૩૫॥

સ્વસ્તિકવિચ્યુઇતિકરણાદ્ દિશો ઘનાઃ ખં વનં સમુદ્રાશ્ચ ।
ઋતવો મહી તથૌઘં વિસ્તીર્ણં ચાભિનેયં સ્યાત્ ॥ ૧૩૬॥

ખટકઃ ખટકે ન્યસ્તઃ ખટકાવર્ધમાનકઃ ।
શ‌ૃઙ્ગારાર્થેષુ યોક્તવ્યઃ પ્રણામકરણે તથા ॥ ૧૩૭॥

અન્યે - કુમુદીતાલવૃન્તેષુ કર્તવ્યશ્છત્રધરણે । ઇતિ ॥ ૧૩૮॥

અરાલૌ તુ વિપર્યસ્તાવુત્તાનૌ વર્ધમાનકૌ ।
ઉત્સઙ્ગ ઇતિ વિજ્ઞેયઃ સ્પર્શસ્ય ગ્રહણે કરઃ ॥ ૧૩૯॥

સનિષ્પેષકૃતે ચૈવ રોમામર્ષકૃતેઽપિ ચ ।
નિષ્પીડિતઃ પુનશ્ચૈવ સ્ત્રીણામીર્ષ્યાકૃતે ભવેત્ ॥ ૧૪૦॥

મુકુલં તુ યદા હસ્તં કપિત્થઃ પરિવેષ્ટયેત્ ।
સ મન્તવ્યસ્તદા હસ્તો નિષધૌ નામ નામતઃ ॥ ૧૪૧॥

સંગ્રહપરિગ્રહૌ ધારણં ચ સમયશ્ચ સત્યવચનં ચ ।
સઙ્ક્ષેપઃ સંક્ષિપ્તં નિપીડિતેનાભિનેતવ્યમ્ ॥ ૧૪૨॥

શિખરસ્તુ યદા હસ્તો મૃગશીર્ષેણ પીડિતઃ ।
નિષધો નામ વિજ્ઞેયઃ સ ભયાર્તે વિધીયતે ॥ ૧૪૩॥

ગૃહીત્વા વામહસ્તેન કર્પુરાભ્યન્તરે ભુજમ્ ।
દક્ષિણં ચાપિ વામસ્ય કર્પુરાભ્યન્તરે ન્યસેત્ ॥ ૧૪૪॥

સ ચાપિ દક્ષિણો હસ્તઃ સમ્યઙ્ મુષ્ટીકૃતો ભવેત્ ।

ઇત્યેષ નિષધો હસ્તઃ કર્મ ચાસ્ય નિબોધત ॥ ૧૪૫॥

એતેન ધૈર્યમદગર્વસૌષ્ઠવૌત્સુક્યવિક્રમાટોપાઃ ।
અભિમાનાવષ્ટમ્ભઃ સ્તમ્ભસ્થૈર્યાદય કાર્યાઃ ॥ ૧૪૬॥

જ્ઞેયો વૈ નિષધો નામ હંસપક્ષૌ પરાઙ્ગમુખૌ ।
જાલવાતાયનાદીનાં પ્રયોક્તવ્યોઽભિઘટ્ટને ॥ ૧૪૭॥

અંસૌ પ્રશિથિલૌ મુક્તૌ પતાકૌ તુ પ્રલમ્બિતૌ ।
યદા ભવેતાં કરણે સ દોલ ઇતિ સંજ્ઞિતઃ ॥ ૧૪૮॥

સંભ્રમવિષાદમૂર્ચ્છિતમદાભિઘાતે તથૈવ ચાઽવેગે ।
વ્યાધિપ્લુતે ચ શસ્ત્રક્ષતે ચ કાર્યોઽભિનયોગઃ ॥ ૧૪૯॥

યસ્તુ સર્પશિરાઃ પ્રોક્તસ્તસ્યાઙ્ગુલિનિરન્તરઃ ।
દ્વિતીયઃ પાર્શ્વસંશ્લિષ્ટઃ સ તુ પુષ્પપુટઃ સ્મૃતઃ ॥ ૧૫૦॥

ધાન્યફલપુષ્પસદૃશાન્યનેન નાનાવિધાનિ યુક્તાનિ ।
ગ્રાહ્યાણ્યુપનેયાનિ ચ તોયાનયનાપનયને ચ ॥ ૧૫૧॥

પતાકૌ તુ યદા હસ્તાવૂર્ધ્વાઙ્ગુષ્ઠાવધોમુખૌ ।
ઉપર્યુપરિ વિન્યસ્તૌ તદા સ મકરઃ કરઃ ॥ ૧૫૨॥

સિંહવ્યાલદ્વિપિપ્રદર્શનં નક્રમકરમત્સ્યાનામ્ ।
યે ચાન્યે ક્રવ્યાદા હ્યભિનેયાસ્તેઽર્થયોગેન ॥ ૧૫૩॥

કૂર્પરાંસોચિતૌ હસ્તૌ યદાસ્તાં સર્પશીર્ષકૌ ।
ગજદન્તઃ સ વિજ્ઞેયઃ કર્મ ચાસ્ય નિબોધત ॥ ૧૫૪॥

એવ ચ વધુવરાણમુદ્વાહે ચાતિભારયોગે ચ ।
સ્તંભગ્રહણે ચ તથા શૈલશિલોત્પાટને ચૈવ ॥ ૧૫૫॥

શુકતુણ્ડૌ કરૌ કૃત્વા વક્ષસ્યભિમુખાઞ્ચિતૌ ।
શનૈરધોમુખાવિદ્ધૌ સોઽવહિત્થ ઇતિ સ્મૃતઃ ॥ ૧૫૬॥

દૌર્બલ્યે નિઃશ્વસિતે ગાત્રાણાં દર્શને તનુત્વે ચ ।
ઉત્કણ્ઠિતે ચ તજ્જ્ઞૈરભિનયયોગસ્તુ કર્તવ્યઃ ॥ ૧૫૭॥

મુકુલસ્તુ યદા હસ્તઃ કપિત્થપરિવેષ્ટિતઃ ।
વર્ધમાનઃ સ વિજ્ઞેયઃ કર્મ ચાસ્ય નિબોધત ॥ ૧૫૮॥

સંગ્રહપરિગ્રહૌ ધારણં ચ સમયશ્ચ સત્યવચં ચ ।
સંક્ષેપતસ્તુ સંક્ષિપ્તં નિપીડિતેનાભિનેતવ્યમ્ ॥ ૧૫૯ ॥

જ્ઞેયો વૈ વર્ધમાનસ્તુ હંસપક્ષો પરાઙ્ગમુખૌ ।
જાલવાતાયનાદીનાં પ્રયોક્તવ્યો વિઘાટને ॥ ૧૬૦ ॥

ઉક્તા હ્યેતે દ્વિવિધા હ્યસંયુતાઃ સંયુતાશ્ચ સંક્ષેપાત્ ।
અભિનયકરાસ્તુ યે ત્વિહ તેઽન્યત્રાપ્યર્થતઃ સાધ્યાઃ ॥ ૧૬૧ ॥

આકૃત્યા ચેષ્ટયા ચિહ્નૈર્જાત્યા વિજ્ઞાય તત્પુનઃ ।
સ્વયં વિતર્ક્ય કર્તવ્યં હસ્તાભિનયનં બુધૈઃ ॥ ૧૬૨ ॥

નાસ્તિ કશ્ચિદહસ્તસ્તુ નાટ્યેઽર્થોઽભિનયં પ્રતિ ।
યસ્ય યદ્ દૃશ્યતે રૂપં બહુશસ્તન્મયોષિતમ્ ॥૧૬૩ ॥

અન્યે ચાપ્યર્થસંયુક્તા લૌકિકા યે કરાસ્ત્વિહ ।
છન્દતસ્તે નિયોક્તવ્યા રસભાવવિચેષ્ટિતૈઃ ॥ ૧૬૪ ॥

દેશં કાલં પ્રયોગં ચાપ્યર્થયુક્તિમવેક્ષ્ય ચ ।
હસ્તા હ્યેતે પ્રયોક્તવ્યાઃ નૃણાં સ્ત્રીણાં વિશેષતઃ ॥ ૧૬૫ ॥

સર્વેષામેવ હસ્તાનાં યાનિ કર્માણિ સન્તિ હિ ।
તાન્યહં સમ્પ્રવક્ષ્યામિ રસભાવકૃતાનિ તુ ॥ ૧૬૬ ॥

ઉત્કર્ષણં વિકર્ષણં તથા ચૈવાપકર્ષણમ્ ।
પરિગ્રહો નિગ્રહશ્ચાહ્વાનં નોદનમેવ ચ ॥ ૧૬૭ ॥

સંશ્લેષશ્ચ વિયોગશ્ચ રક્ષણં મોક્ષણં તથા ।
વિક્ષેપધૂનને ચૈવ વિસર્ગસ્તર્જનં તથા ॥ ૧૬૮ ॥

છેદનં ભેદનં ચૈવ સ્ફોટનં મોટનં તથા ।
તાડનં ચેતિ વિજ્ઞેયં તજ્જ્ઞૈઃ કર્મ કરાન્ પ્રતિ ॥ ૧૬૯ ॥

ઉત્તાનઃ પાર્શ્વગશ્ચૈવ તથાઽધોમુખ એવ ચ ।
હસ્તપ્રચારસ્ત્રિવિધો નાટ્યતત્ત્વસમાશ્રયઃ ॥ ૧૭૦ ॥

સર્વે હસ્તપ્રચારાશ્ચ પ્રયોગેષુ યથાવિધિઃ
નેત્રભ્રૂમુખરાગૈશ્ચ કર્તવ્યા વ્યઞ્જિઅતા બુધૈઃ ॥ ૧૭૧ ॥

કરણં કર્મ સ્થાનં પ્રચાયુક્તિં ક્રિયાં ચ સમ્પ્રેક્ષ્ય ।
હસ્તાભિનયતજ્જ્ઞૈઃ કાર્યો લોકોપચારેણ ॥ ૧૭૨ ॥

ઉત્તામાનાં કરાઃ કાર્યા લલાટક્ષેત્રચારિણઃ ।
વક્ષઃસ્થાશ્ચૈવ મધ્યાનામધમામધોગતા ॥ ૧૭૩॥

જ્યેષ્ઠે સ્વલ્પપ્રચારાઃ સ્યુર્મધ્યે મધ્યવિચારિણઃ ।
અધમેષુ પ્રકીર્ણાશ્ચ હસ્તાઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૧૭૪॥

લક્ષણવ્યઞ્જિતા હસ્તાઃ કાર્યાસ્તૂત્તમમધ્યમૈઃ ।
લોકક્રિયાસ્વભાવેન નીચૈરપ્યર્થસંશ્રયાઃ ॥ ૧૭૫॥

અથવાન્યાદૃશં પ્રાપ્ય પ્રયોગં કાલમેવ ચ ।
વિપરીતાશ્રયા હસ્તાઃ પ્રયોક્તવ્યા બુધૈર્ન વા ॥ ૧૭૬॥

વિષણ્ણે મૂર્ચ્છિતે ભીતે જુગુપ્સાશોકપીડિતે ।
ગ્લાને સ્વપ્ને વિહસ્તે ચ નિશ્ચેષ્ટે તન્દ્રિતે જડે ॥ ૧૭૭॥

વ્યાધિગ્રસ્તે જરાર્તે ચ ભયાર્તે શીતવિપ્લુતે ।
મત્તે પ્રમત્તે ચોન્મત્તે ચિન્તાયાં તપસિ સ્થિતે ॥ ૧૭૮॥

હિમવર્ષહતે બદ્ધે વરિણાપ્લવસંશ્રિતે ।
સ્વપ્નાયિતે ચ સંભ્રાન્તે નતસંસ્ફોટને તથા ॥ ૧૭૯॥

ન હસ્તાભિનયઃ કાર્યઃ કાર્યઃ સત્ત્વસ્ય સંગ્રહઃ ।
તથા કાકુવિશેષશ્ચ નાનાભવરસાન્વિતઃ ॥ ૧૮૦॥

યત્ર વ્યગ્રાવુભૌ હસ્તૌ તત્તદ્ દૃષ્ટિવિલોકનૈઃ ।
વાચકાભિનયં કુર્યાદ્વિરામૈર્થદર્શકૈઃ ॥ ૧૮૧॥

ઉત્તાનઃ પાર્શ્વગશ્ચૈવ તથાઽધોમુખ એવ ચ ।
પ્રચારસ્ત્રિવિધોઽઙ્ગાનાં નાટ્યનૃત્તસમાશ્રયઃ ॥ ૧૮૨॥

ઉત્તાનો વર્તુલસ્ત્ર્યશ્રઃ સ્થિતોઽધોમુખ એવ ચ ।
પઞ્ચ પ્રકારા હસ્તસ્ય નાટ્યનૃત્તસમાશ્રયાઃ ॥ ૧૮૩॥

એવં જ્ઞેયાઃ કરા હ્યેતે નાભિનયસંશ્રિતાઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ હસ્તાન્ નૃત્તસમાશ્રયાન્ ॥ ૧૮૪॥

વક્ષસોઽષ્ટાઙ્ગુલસ્થૌ તુ પ્રાઙ્મુખૌ ખટકામુખૌ ।
સમાનકૂર્પરાંસૌ તુ ચતુરસ્રૌ પ્રકીર્તિતૌ ॥ ૧૮૫॥

હંસપક્ષકૃતૌ હસ્તૌ વ્યાવૃતૌ તાલવૃન્તવત્ ।

ઉદ્વૃત્તાવિતિ વિજ્ઞેયાવથવા તાલવૃન્તકૌ ॥ ૧૮૬॥

ચતુરસ્રસ્થિતૌ હસ્તૌ હંસપક્ષકૃતૌ તથા ।
તિર્યક્સ્થિતૌ ચાભિમુખૌ જ્ઞેયૌ તાલમુખાવિતિ ॥ ૧૮૭॥

તાવેવ મણિબન્ધાન્તે સ્વસ્તિકાકૃતિસંસ્થિતૌ ।
સ્વસ્તિકાવિતિ વિખ્યાતૌ વિચ્યુતૌ વિપ્રકીર્ણકૌ ॥ ૧૮૮॥

અલપલ્લવસંસ્થાનાવુર્ધ્વાસ્યૌ પદ્મકોશકૌ ।
અરાલખટકાખ્યૌ ચાપ્યરાલખટકામુખૌ ॥ ૧૮૯॥

તથૈ મણિબન્ધાન્તે હ્યરાલૌ વિચ્યુતાવુભૌ ।
જ્ઞેયૌ પ્રયોક્તૃભિર્નિત્યમરાલ ખટકાવિતિ ॥ ૧૯૦॥

ભુજાંસકૂર્પરાગ્રૈસ્તુ કુટિલાવર્તિતૌ કરૌ ।
પરાઙ્ગમુખતલાવિદ્ધૌ જ્ઞેયાવાવિદ્ધવક્રકૌ ॥ ૧૯૧॥

હસ્તૌ તુ સર્પશિરસૌ મધ્યમાઙ્ગુષ્ઠકૌ યદા ।
તિર્યક્પ્રસારિતાસ્યૌ  ચ તદા સૂચીમુખૌ સ્મૃતૌ ॥ ૧૯૨॥

સર્પશીર્ષૌ યદા હસ્તૌ ભવેતાં સ્વસ્તિકસ્થિતૌ ।
મધ્યપ્રસારિતાઙ્ગુષ્ઠૌ જ્ઞેયૌ સૂચીમુખૌ તદા ॥ ૧૯૩॥

રેચિતૌ ચાપિ વિજ્ઞેયૌ હંસપક્ષૌ  દ્રુતભ્રમૌ ।
પ્રસારિતોત્તાનતલૌ રેચિતાવિતિ સંજ્ઞિતૌ ॥ ૧૯૪॥

ચતુરસ્રો ભવેદ્વામઃ સવ્યહસ્તશ્ચ રેચિતઃ ।
વિજ્ઞેયૌ નૃત્તતત્ત્વજ્ઞૈર્ધરેચિતસંજ્ઞકૌ ॥ ૧૯૫॥

અઞ્ચિતૌ કૂર્પરાંસૌ તુ ત્રિપતાકૌ કરૌ કૃતૌ ।
કિઞ્ચિત્તિર્યગ્ગતાવેતૌ સ્મૃતાવુત્તનવઞ્ચિતૌ ॥ ૧૯૬॥

મણિબન્ધમુક્તૌ તુ પતાકૌ પલ્લવૌ સ્મૃતૌ ।
બાહુશીર્ષાદ્વિનિષ્ક્રાન્તૌ નિતમ્બાવિતિ કીર્તિતૌ ॥ ૧૯૭॥

કેશદેશાદ્વિનિષ્ક્રાન્તૌ પરિપાર્શ્વોત્થિતૌ યદા ।
વિજ્ઞેયો કેશબન્ધૌ  તુ કરવાચાર્યસમ્મતૌ ॥ ૧૯૮॥

તિર્યક્પ્રસારિતૌ ચૈવ પાર્શ્વસંસ્થૌ તથૈવ ચ ।
લતાખ્યૌ ચ કરૌ જ્ઞેયૌ નૃત્તાભિનયનં પ્રતિ ॥ ૧૯૯॥

સમુન્નતો લતાહસ્તઃ પાર્શ્વાત્પાર્શ્વં વિલોલિતઃ ।
ત્રિપતાકોઽપરઃ કર્ણે કરિહસ્તઃ પ્રકીર્તિતઃ ॥ ૨૦૦॥

કટિશીર્ષનિવિષ્ટાગ્રૌ ત્રિપતાકૌ  યદા કરૌ ।
પક્ષવઞ્ચિતકૌ હસ્તૌ તદા જ્ઞેયૌ પ્રયોક્તૃભિઃ ॥ ૨૦૧॥

તાવેવ તુ પરાવૃત્તૌ પક્ષપ્રદ્યોતકૌ સ્મૃતૌ ।
અધોમુખતલાવિદ્ધૌ જ્ઞેયૌ ગરુડપક્ષકૌ ॥ ૨૦૨॥

હંસપક્ષકૃતૌ હસ્તૌ વ્યાવૃત્તપરિવર્તિતૌ ।
તથા પ્રસારિતભુજૌ દણ્ડપક્ષાવિતિ સ્મૃતૌ ॥ ૨૦૩॥

ઊર્ધ્વમણ્ડલિનૌ હસ્તાવૂર્ધ્વદેશવિવર્તનાત્ ।
તાવેવ પાર્શ્વવિન્યસ્તૌ પાર્શ્વમણ્ડલિનૌ સ્મૃતૌ ॥ ૨૦૪॥

ઉદ્વેષ્ટિતૌ ભવેદેકૌ દ્વિતીયશ્ચાપવેષ્ટિતઃ ।
ભ્રમિતાવુરસઃ સ્થાને હ્યુરોમણ્ડલિનૌ સ્મૃતૌ ॥ ૨૦૫॥

અલપલ્લવકારાલાવુરોદ્ભ્રમણક્રમાત્ ।
પાર્શ્વાવર્તશ્ચ વિજ્ઞેયાવુરઃ પાર્શ્વાર્ધમણ્ડલૌ ॥ ૨૦૬॥

હસ્તૌ તુ મણીબન્ધાન્તે કુઞ્ચિતાવઞ્ચિતૌ યદા ।
ખટકાખ્યૌ તુ તૌ સ્યાતાં મુષ્ટિકસ્વસ્તિકૌ તદા ॥ ૨૦૭॥

પદ્મકોશૌ યદા હસ્તૌ વ્યાવૃત્તપરિવર્તિતૌ ।
નલિનીપદ્મકોશૌ તુ તદા જ્ઞેયૌ પ્રયોક્તૃભિઃ ॥ ૨૦૮॥

કરાવુદ્વેષ્ટિતાગ્રૌ તુ પ્રવિધાયાલપલ્લવૌ ।
ઊર્ધ્વપ્રસરિતાવિદ્ધૌ કર્તવ્યાવુલ્બણાવિતિ ॥ ૨૦૯॥

પલ્લવૌ ચ શિરોદેશે સમ્પ્રાપ્તૌ લલિતૌ સ્મૃતૌ ।
કર્પૂરસ્વસ્તિકગતૌ લતાખ્યૌ વલિતાવિતિ ॥ ૨૧૦॥

કરણે તુ પ્રયોક્તવ્યો નૃત્તહસ્તો વિશેષતઃ ।
તથાર્થાભિનયે ચૈવ પતાકાયાઃ પ્રયોક્તૃભિઃ ॥ ૨૧૧॥

સંકરોઽપિ ભવેત્તેષાં પ્રયોગોઽર્થવશાત્પુનઃ ।
પ્રાધાન્યેન પુનઃ સંજ્ઞા નાટ્યે નૃત્તે કરેષ્વિહ ॥ ૨૧૨॥

વિયુતાઃ સંયુતાશ્ચૈવ નૃત્તહસ્તાઃ પ્રકીર્તિતાઃ ।
અતઃ પરં પ્રવક્ષ્યામિ કરાન્ કરણસંશ્રયાન્ ॥ ૨૧૩॥

સર્વેષામેવ હસ્તાનાં નાટ્યહસ્તનિદેશિભિઃ ।
વિધાતવ્યા પ્રયત્નેન કરણં તુ ચતુર્વિધમ્ ॥ ૨૧૪॥

અપવેષ્ટિતમેકં સ્યાત્ ઉદ્વેષ્ટિતમથાપરમ્ ।
વ્યાવર્તિતં તૃતીયં તુ ચતુર્થં પરિવર્તિતમ્ ॥ ૨૧૫॥

આવેષ્ટ્યન્તે યદઙ્ગુલ્યસ્તર્જનાદ્યા યથાક્રમમ્ ।
અભ્યન્તરેણ કરણં તદાવેષ્ટિતમુચ્યતે ॥ ૨૧૬॥

ઉદ્વેષ્ટ્યન્તે યદઙ્ગુલ્યઃ તર્જન્યાદ્યા બહિર્મુખમ્ ।
ક્રમશઃ કરણં વિપ્રાસ્તદુદ્વેષ્ટિતમુચ્યતે ॥ ૨૧૭॥

આવર્ત્યન્તે કનિષ્ઠાદ્યા હ્યઙ્ગુલ્યોઽભ્યન્તરેણ તુ ।
યથા ક્રમેણ કરણં તદ્ વ્યાવર્તિતમુચ્યતે ॥ ૨૧૮॥

ઉદ્વર્ત્યન્તે કનિષ્ઠાદ્યા બાહ્યતઃ ક્રમશો યદા ।
અઙ્ગુલ્યઃ કરણં વિપ્રાસ્તદુક્તં પરિવર્તિતમ્ ॥ ૨૧૯॥

નૃત્તેઽભિનયયોગે વા પાણિભિર્વર્તનાશ્રયે ।
મુખભ્રુનેત્રયુક્તાનિ કરણાનિ પ્રયોજયેત્ ॥ ૨૨૦॥

તિર્યક્તથોર્ધ્વસંસ્થો હ્યધોમુખશ્ચાઞ્ચિતોઽપવિદ્ધસ્તુ ।
મણ્ડલગતિસ્તથા સ્વસ્તિકશ્ચ પૃષ્ઠાનુસારિ ચ ॥ ૨૨૧॥

ઉદ્વેષ્ટિતઃ પ્રસારિત ઇત્યેતે વૈ સ્મૃતાઃ પ્રકારાસ્તુ ।
બાહ્વોરિતિ કરણગતા વિજ્ઞેયા નિત્યં નૃત્તપ્રયોક્તૃભિઃ ॥ ૨૨૨॥

હસ્તાનાં કરણવિધિર્મયા સમાસેન નિગદિતો વિપ્રાઃ ।
અત ઊર્ધ્વં વ્યાખ્યાસ્યે હૃદયોદરપાર્શ્વકર્માણિ ॥ ૨૨૩॥

આભુગ્નમથ નિર્ભુગ્નં તથા ચૈવ પ્રકમ્પિતમ્ ।
ઉદ્વાહિતં સમં ચૈવ ઉરઃ પઞ્ચવિધં સ્મૃતમ્ ॥ ૨૨૪॥

નિમ્નમુન્નતપૃષ્ઠં ચ વ્યાભુગ્નાંસં શ્લથં ક્વચિત્
આભુગ્નં તદુરો જ્ઞેયં કર્મ ચાસ્ય નિબોધત ॥ ૨૨૫॥

સંભ્રમવિષાદમૂર્ચ્છાશોકભયવ્યાધિહૃદયશલ્યેષુ ।
કાર્યં શીતસ્પર્શે વર્ષે લાજાન્વિતેઽર્થવશાત્ ॥ ૨૨૬॥

સ્તબ્ધં ચ નિમ્નપૃષ્ઠં ચ નિર્ભુગ્નાંસં સમુન્નતમ્ ।

ઉરો નિર્ભુગ્નમેતદ્ધિ કર્મ ચાસ્ય નિબોધત ॥ ૨૨૭॥

સ્તમ્ભે માનગ્રહણે વિસ્મયદૃષ્ટે ચ સત્યવચને ચ ।
અહમિતિ ચ દર્પવચને ગર્વોત્સેકે તુ કર્તવ્યમ્ ॥૨૨૮॥

[દીર્ઘનિશ્વસિતે ચૈવ જૃમ્ભણે મોટને તથા ।
બિબ્બોકે ચ પુનઃ સ્ત્રીણાં તદ્વિજ્ઞેયં પ્રયોક્તૃભિઃ ] ॥ ૨૨૯॥

ઊર્ધ્વોત્ક્ષેપૈરુરો યત્ર નિરન્તરકૃતૈઃ કૃતમ્ ।
પ્રકમ્પિતં તુ વિજ્ઞેયમુરો નાટ્યપ્રયોક્તૃભિઃ ॥ ૨૩૦॥

હસિતરુદિતાદિસંભ્રમભયશ્રમવ્યાધિપીડિતાર્થેષુ ।
નાનાભાવોપગતં કાર્યમુરો નાટ્યયોગેષુ ॥ ૨૩૧॥

હસિતરુદિતેષુ કાર્યે શ્રમે ભયે શ્વસકાશયોશ્ચૈવ ।
હિક્કાદુઃખે ચ તથા નાટ્યજ્ઞૈરર્થયોગેન ॥ ૨૩૨॥

ઉદ્વાહિતમૂર્ધ્વગતમુરો  જ્ઞેયં પ્રયોક્તૃભિઃ  ।
દીર્ઘોચ્છ્વસનતા લોકે જૃમ્ભનાદિષુ ચેક્ષ્યતે॥ ૨૩૩॥ સર્વૈઃ
સસૌષ્ઠવૈરઙ્ગૈશ્ચતુરસ્રકૃતૈઃ કૃતમ્ ।
ઉરઃ સમન્। તુ વિજ્ઞેયં સ્વસ્થં સૌષ્ઠવસંયુતમ્ ॥ ૨૩૪॥

એતદુક્તં મય સમ્યગરસસ્તુ વિકલ્પનમ્ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ પાર્શ્વયોરિહ  લક્ષણમ્ ॥ ૨૩૫॥

નતં સમુન્નતં ચૈવ પ્રસારિતવિવર્તિતો ।
તથાપસૃતમેવં તુ પાર્શ્વયોઃ કર્મ પઞ્ચધા ॥ ૨૩૬॥

કટિર્ભવેત્તુ વ્યાભુગ્ના પાર્શ્વમાભુગ્નમેવ ચ ।
તથૈવાપસૃતાંસં ચ કિઞ્ચિત્પાર્શ્વનતં સ્મૃતમ્ ॥ ૨૩૭॥

તસ્યૈવ ચાપરં પાર્શ્વં વિપરીતં તુ યુક્તિતઃ ।
કટીપાર્શ્વભુજાંસૈશ્ચાભ્યુન્નતૈરુતં ભવેત્ ॥ ૨૩૮॥

આયામનાદુભયતઃ પાશ્વયોઃ સ્યાત્ પ્રસારિતમ્  ।
પરિવર્તાત્રિકસ્યાપિ વિવર્તિતમિહેષ્યતે ॥ ૨૩૯॥

વિવર્તિતાપનયનાદ્ ભવેદપસૃતં પુનઃ ।
પાર્શ્વલક્ષણમિત્યુક્તં વિનિયોગં નિબોધત ॥ ૨૪૦॥

ઉપસર્પે નતં કાર્યમુન્નતં ચાપસર્પણે ।

પ્રસારિતં પ્રહર્ષાદૌ પરિવૃત્તે વિવર્તિતમ્ ॥ ૨૪૧॥

વિનિવૃત્તે ત્વપસૃતં પાર્શ્વમર્થવશાદ્ભવેત્ ।
એતાનિ પાર્શ્વકર્માણિ જઠરસ્ય નિબોધત ॥ ૨૪૨॥

ક્ષામં ખલ્વં ચ પૂર્ણં ચ સમ્પ્રોક્તમુદરં ત્રિધા ।
તનુ ક્ષામં નતં ખલ્વં પૂર્ણમાધ્માતમુચ્યતે ॥ ૨૪૩॥

ક્ષામં હાસ્યેઽથ રુદિતે નિઃશ્વાસે જૃમ્ભને ભવેત્ ।
વ્યાધિતે તપસિ શ્રાન્તે ક્ષુધાર્તે ખલ્વમિષ્યતે ॥ ૨૪૪॥

પૂર્ણમુચ્છ્વસિતે સ્થૂલે વ્યાધિતાત્યશનાદિષુ ।
ઇત્યેતદુદરં પ્રોક્તં કટ્યાઃ કર્મ નિબોધત ॥ ૨૪૫॥

અન્યે તુ
ક્ષામં ખલ્વં સમં પૂર્ણમુદરં સ્યાચ્ચતુર્વિધમ્ ।
છિના ચૈવ નિવૃત્તા ચ રેચિતા કમ્પિતા તથા ।
ઉદ્વાહિતા ચૈવ કટી નાટ્યે નૃત્તે ચ પઞ્ચધા ॥ ૨૪૬॥

કટી મધ્યસ્ય વલનાત્ચ્છિના સમ્પરિકીર્તિતા ।
પરાઙ્ગ્મુખસ્યાભિમુખી નિવૃત્તા સ્યાન્નિવર્તિતા ॥ ૨૪૭॥

સર્વતો ભ્રમણાચ્ચાપિ વિજ્ઞેયા રેચિતા કટી ।
તિર્યગ્ગતાગતા ક્ષિપ્રા કટી જ્ઞેયા પ્રકમ્પિતા ॥ ૨૪૮॥

નિતમ્બપાર્શ્વોદ્વહનાત્ શનૈઇરુદ્વાહિતા કટી ।
કટીકર્મ મયા પ્રોક્તં વિનિયોગં નિબોધત ॥ ૨૪૯॥

છિન્ના વ્યાયામસમ્ભ્રાન્તવ્યાવૃત્તપ્રેક્ષણાદિષુ ।
નિવૃત્તા વર્તને ચૈવ રેચિતા ભ્રમણાદિષુ ॥ ૨૫૦॥

કુબ્જવામનનીચાનાં ગતૌ કાર્યા પ્રકમ્પિતા ।
સ્થૂલેષૂદ્વાહિઓતા યોજ્યા સ્ત્રીણાં લીલાગતેષુ ચ ॥ ૨૫૧॥

કમ્પનં વલનં ચૈવ સ્તમ્ભનોદ્વર્તને તથા ।
નિવર્તનં ચ પઞ્ચૈતાન્યૂરુકર્માણિ કારયેત્ ॥ ૨૫૨॥

નમનોન્નમનાત્પાર્ષ્ણ્યોર્મુહુઃ સ્યાદૂરુકમ્પનમ્ ।
ગચ્છેદભ્યન્તરં જાનુ યત્ર તદ્વલનં સ્મૃતમ્ ॥ ૨૫૩॥

સ્તમ્ભનં ચાપિ વિજ્ઞેયમપવિદ્ધક્રિયાત્મકમ્ ।

વલિતાવિદ્ધકરણાદૂર્વોરુદ્વર્તનં સ્મૃતમ્ ॥ ૨૫૪॥

પાર્ષ્ણિરભ્યન્તરં ગચ્છેદ્યત્ર તત્તુ નિવર્તનમ્ ।
ગતિષ્વધમપાત્રાણાં ભયે ચાપિ હિ કમ્પનમ્ ॥ ૨૫૫॥

વલનં ચૈવ હિ કર્તવ્યં સ્ત્રીણાં સ્વૈરપરિક્રમે ।
સાધ્વસે ચ વિષાદે ચ સ્તમ્ભનં તુ પ્રયોજયેત્ ॥૨૫૬॥

વ્યાયામે તાણ્ડવે ચૈવ કાર્યમુદ્વર્તનં બુધૈઃ ।
નિવર્તનં તુ કર્તવ્યં સમ્ભ્રાદિપરિભ્રમે ॥ ૨૫૭॥

યથાદર્શનમન્યચ્ચ લોકાદ્ ગ્રાહ્યં પ્રયોક્તૃભિઃ ।
ઇત્યૂર્વોર્લક્ષણં પ્રોક્તં જઙ્ઘાયાસ્તુ નિબોધત ॥ ૨૫૮॥

આવર્તિતં નતં ક્ષિપ્તમુદ્વાહિતમથાપિ ચ ।
પરિવૃત્તં તથા ચૈવ જઙ્ઘાકર્માણિ પઞ્ચધા ॥ ૨૫૯॥

વામો દક્ષિણપાર્શ્વેન દક્ષિણશ્ચાપિ વામતઃ ।
પાદો યત્ર વ્રજેદ્વિપ્રાઃ તદાવર્તિતમુચ્યતે ॥ ૨૬૦॥

જઙ્ઘાસ્વસ્તિકયોગેન ક્રમાદાવર્તિતં નયેત્ ।
જાનુનઃ કુઞ્ચનાચ્ચૈવ નતં જ્ઞેયં પ્રયોક્તૃભિઃ ।
વિક્ષેપાચ્ચૈવ જઙ્ઘાયાઃ ક્ષિપ્તમિત્યભિધીયતે ॥ ૨૬૧॥

[નતં સ્યાજ્જાનુનમનાત્ ક્ષિપ્તં વિક્ષેપણાદ્ બહિ] ।
ઉદ્વાહિતં ચ વિજ્ઞેયમૂર્ધ્વમૂદ્વાહનાદપિ ।
પ્રતીપનયનં યત્તુ પરિવૃત્તં તદુચ્યતે ॥ ૨૬૨॥

આવર્તિતં પ્રયોક્તવ્યં વિદૂષકપરિક્રમે ।
નતં ચાપિ હિ કર્તવ્યં સ્થાનાસનગતાદિષુ ॥ ૨૬૩॥

ક્ષિપ્તં વ્યાયામયોગેષુ તાણ્ડવે ચ પ્રયુજ્યતે ।
તથા ચોદ્વાહિતં કુર્યાદાવિદ્ધગમનાદિષુ ॥ ૨૬૪॥

તાણ્ડવેષુ પ્રયોક્તવ્યં પરિવૃત્તં પ્રયોક્તૃભિઃ ।
ઇત્યેતજ્જઙ્ઘયોઃ કર્મ પાદયોસ્તુ નિબોધત ॥ ૨૬૫॥

ઉદ્ઘટ્ટિતઃ સમશ્ચૈવ તથાગ્રતલસઞ્ચરઃ ।
અઞ્ચિતઃ કુઞ્ચિતશ્ચૈવ પાદઃ પઞ્ચવિધ સ્મૃતઃ ॥ ૨૬૬॥

સ્થિત્વા પાદતલાગ્રેણ પાર્ષ્ણિર્ભૂમૌ નિપાત્યતે ।

યસ્ય પાદસ્ય કરણે ભવેદુદ્ઘટ્ટિતસ્તુ સઃ ॥ ૨૬૭॥

અયમુદ્વેષ્ટિતકરણે ત્વનુકરણાર્થં પ્રયોગમાસાદ્ય ।
દ્રુતમધ્યમપ્રચારઃ સકૃદસકૃદા પ્રયોક્તવ્યઃ ॥ ૨૬૮॥

સ્વભાવરચિતે ભૂમૌ સમસ્થાને ચ યો ભવેત્ ।
સમઃ પાદઃ સ વિજ્ઞેયઃ સ્વભાવાભિનયાશ્રયઃ ॥ ૨૬૯॥

સ્થિરસ્વભાવાભિનયે નાનાકરણસંશ્રયે ।
ચલિતશ્ચ પુનઃ કાર્યો વિધિજ્ઞૈઃ પાદરેચિતે ॥ ૨૭૦॥

સમસ્યૈવ યદા પાર્ષ્ણિઃ પાદસ્યાભ્યન્તરે ભવેત્ ।
બહિઃ પાર્શ્વસ્થિતોઽઙ્ગુષ્ઠસ્ત્ર્યશ્રપાદસ્તુ સ સ્મૃતઃ ॥ ૨૭૧॥

ત્યક્ત્વા (કૃત્વા?) સમપદં સ્થાનમશ્વક્રાન્તે તથૈવ ચ ।
સ્યાદ્વિક્લવાદિષ્વર્થેષુ ત્ર્યશ્રઃ પાદો યથાવિધિઃ ॥ ૨૭૨॥

અસ્યૈવ સમપાદસ્ય પાર્ષ્ણિરભ્યન્તરે ભવેત્ ।
ત્ર્યશ્રપાદઃ સ વિજ્ઞેયઃ સ્થાનકાદિષુ સંશ્રયઃ ॥ ૨૭૩॥

ઉત્ક્ષિપ્તા તુ ભવેત્પાર્ષ્ણિઃ પ્રસૃતોઙ્ગુષ્ઠકસ્તથા ।
અઙ્ગુલ્યશ્ચાઞ્ચિતાઃ સર્વા પાદેઽગ્રતલસઞ્ચરઃ ॥ ૨૭૪॥

તોદનનિકુટ્ટને સ્થિતનિશુમ્ભને ભૂમિતાડને ભ્રમણે ।
વિક્ષેપવિવિધરેચકપાર્ષ્ણિકૃતાગમનમેતેન ॥ ૨૭૫॥

પાર્ષ્ણિર્યસ્યાઞ્ચિતા ભૂમૌ પાદમગ્રતલં તથા ।
અઙ્ગુલ્યશ્ચાઞ્ચિતાઃ સર્વાઃ સ પાદસ્ત્વઞ્ચિતઃ સ્મૃતઃ ॥ ૨૭૬॥

પાદાગ્રતલસઞ્ચારે વર્તિતોદ્વર્તિતે તથા ।
એવ પાદાહતે કાર્યો નાનાભ્રમરકેષુ ચ ॥ ૨૭૭॥

ઉત્ક્ષિપ્તા યસ્ય પાર્ષ્ણી સ્યાદઙ્ગુલ્યઃ કુઙ્ચિતાસ્તથા ।
તથા કુઞ્ચિતમધ્યશ્ચ સ પાદં કુઞ્ચિતઃ સ્મૃતઃ ॥ ૨૭૮॥

ઉદત્તગમને ચૈવ વર્તિતોદ્વર્તિતે તથા ।
ઉત્ક્ષિપ્તા તુ ભવેત્પાર્ષ્ણિરઙ્ગુષ્ઠાગ્રેણ સંસ્થિતઃ ॥ ૨૭૯॥

વામશ્ચૈવ સ્વભાવસ્થઃ સૂચીપાદઃ પ્રકીર્તિતઃ ।
નૃત્તે નૂપુરકરણે પ્રયોગસ્તસ્ય કીર્ત્યતે ॥ ૨૮૦॥

અતિક્રાન્તક્રમે ચૈવ પાદમેતં પ્રયોજયેત્ ।
પાદજઙ્ઘોરુકરણં કર્મ કાર્યં પ્રયોક્તૃભિઃ ॥ ૨૮૧॥

પાદસ્ય કરણં સર્વં જઙ્ઘોરુકૃતમિષ્યતે ।
યથા પાદઃ પ્રવર્તેત તથૈવોરુઃ પ્રવર્તતે ॥ ૨૮૨॥

અનયોઃ સમાનકરણાત્ પાદચારી પ્રયોજયેત્ ।
ઇત્યેતદઙ્ગજં પ્રોક્તં લક્ષણં કર્મ ચૈવ હિ ॥ ૨૮૩॥

અતઃ પરં પ્રવક્ષ્યામિ ચારીવ્યાયામલક્ષણમ્ ॥ ૨૮૪॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે અઙ્ગાભિનયો નામ નવમોઽધ્યાયઃ ।

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 9*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*